श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे एकादशोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ पञ्चमस्कन्धे एकादशोऽध्यायः ॥

ब्राह्मण उवाच

अकोविदः कोविदवादवादान्
वदस्यथो नातिविदां वरिष्ठः।
न सूरयो हि व्यवहारमेनं
तत्त्वावमर्शेन सहामनन्ति ॥ 1 ॥

तथैव राजन्नुरुगार्हमेध -
वितानविद्योरुविजृम्भितेषु।
न वेदवादेषु हि तत्त्ववादः
प्रायेण शुद्धो नु चकास्ति साधुः ॥ 2 ॥

न तस्य तत्त्वग्रहणाय साक्षाद्
वरीयसीरपि वाचः समासन्।
स्वप्ने निरुक्त्या गृहमेधिसौख्यं
न यस्य हेयानुमितं स्वयं स्यात् ॥ 3 ॥

यावन्मनो रजसा पूरुषस्य
सत्त्वेन वा तमसा वानुरुद्धम्।
चेतोभिराकूतिभिरातनोति
निरङ्कुशं कुशलं चेतरं वा ॥ 4 ॥

स वासनात्मा विषयोपरक्तो
 गुणप्रवाहो विकृतः षोडशात्मा।
बिभ्रत्पृथङ्नामभिरूपभेद -
 मन्तर्बहिष्ट्वं च पुरैस्तनोति॥ **5**॥

दुःखं सुखं व्यतिरिक्तं च तीव्रं
 कालोपपन्नं फलमाव्यनक्ति।
आलिङ्ग्य मायारचितान्तरात्मा
 स्वदेहिनं संसृतिचक्रकूटः॥ **6**॥

तावानयं व्यवहारः सदाविः
 क्षेत्रज्ञसाक्ष्यो भवति स्थूलसूक्ष्मः।
तस्मान्मनो लिङ्गमदो वदन्ति
 गुणागुणत्वस्य परावरस्य॥ **7**॥

गुणानुरक्तं व्यसनाय जन्तोः
 क्षेमाय नैर्गुण्यमथो मनः स्यात्।
यथा प्रदीपो घृतवर्तिमश्नन्
 शिखाः सधूमा भजति ह्यन्यदा स्वम्।
पदं तथा गुणकर्मानुबद्धं
 वृत्तीर्मनः श्रयतेऽन्यत्र तत्त्वम्॥ **8**॥

एकादशासन्मनसो हि वृत्तय
 आकूतयः पञ्च धियोऽभिमानः।
मात्राणि कर्माणि पुरं च तासां
 वदन्ति हैकादश वीर भूमीः॥ **9**॥

गन्धाकृतिस्पर्शरसश्रवांसि
 विसर्गरत्यर्त्यभिजल्पशिल्पाः।

एकादशं स्वीकरणं ममेति
    शय्यामहं द्वादशमेक आहुः ॥ **10** ॥

द्रव्यस्वभावाशयकर्मकालै -
    रेकादशामी मनसो विकाराः।
सहस्रशः शतशः कोटिशश्च
    क्षेत्रज्ञतो न मिथो न स्वतः स्युः ॥ **11** ॥

क्षेत्रज्ञ एता मनसो विभूती -
    र्जीवस्य मायारचितस्य नित्याः।
आविर्हिताः क्वापि तिरोहिताश्च
    शुद्धो विचष्टे ह्यविशुद्धकर्तुः ॥ **12** ॥

क्षेत्रज्ञ आत्मा पुरुषः पुराणः
    साक्षात्स्वयञ्ज्योतिरजः परेशः।
नारायणो भगवान् वासुदेवः
    स्वमाययाऽऽत्मन्यवधीयमानः ॥ **13** ॥

यथानिलः स्थावरजङ्गमाना -
    मात्मस्वरूपेण निविष्ट ईशेत्।
एवं परो भगवान् वासुदेवः
    क्षेत्रज्ञ आत्मेदमनुप्रविष्टः ॥ **14** ॥

न यावदेतां तनुभृन्नरेन्द्र
    विधूय मायां वयुनोदयेन।
विमुक्तसङ्गो जितषट्सपत्नो
    वेदात्मतत्त्वं भ्रमतीह तावत् ॥ **15** ॥

न यावदेतन्मन आत्मलिङ्गं
    संसारतापावपनं जनस्य।

यच्छोकमोहामयरागलोभ -
वैरानुबन्धं ममतां विधत्ते ॥ **16** ॥

भ्रातृव्यमेनं तददभ्रवीर्य -
मुपेक्षयाध्येधितमप्रमत्तः ।
गुरोर्हरेश्चरणोपासनास्त्रो
जहि व्यलीकं स्वयमात्ममोषम् ॥ **17** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे ब्राह्मणरहूगणसंवादे एकादशोऽध्यायः ॥